नमामि दूतं रामस्य सुखदं च सुरद्रुमम्

पीनवृत्त महाबाहुं सर्वशत्रुनिवारणम् ॥ १ ॥

नानारत्नसमायुक्तं कुंडलादिविराजितम्।

सर्वदाभीऽष्टदातारं सतां वै दृढमाहवॆ ॥ २ ॥

वासिनं चक्रतीर्थस्य दक्षिणस्थगिरौ सदा।

तुंगांबॊधितरंगस्य वातॆनपरिशॊभितॆ ॥ ३ ॥

नानादॆशगतैः सद्भिः सॆव्यमानं नृपॊत्तमैः।

धूपदीपादिनैवॆद्यैः पंचखाद्यैश्चशक्तितः ॥ ४ ॥

भजामि श्रीहनुमंतं हॆमकांतिसमप्रभम्।

व्यासतीर्थयतींद्रॆण पूजितं च विधानतः ॥ ५ ॥

त्रिवारं यः पठॆन्नित्यं स्तॊत्रं भक्त्याद्विजॊत्तमः ।

वांचितं लभतॆऽभीष्टं षण्मासाभ्यंतरॆ खलु ॥ ६ ॥

पुत्रार्थी लभतॆ पुत्रं यशॊर्थी लभतॆ यशः।

विद्यार्थी लभतॆ विद्यां धनार्थीलभतॆ धनम् ॥ ७ ॥